# योगशास्त्रे प्रतिपादितानाम् अन्तःकरणस्य पञ्चवृत्तीनां विषये वेदान्तशास्त्रदृष्ट्या विमर्शः, तस्मिन् विषये आयुर्वेदशास्त्रस्य विचाराश्च



प्रज्वलः जे
शोधच्छात्रः,
श्रिङ्गेरी परिसरः,
केन्द्रीयविश्वविद्यालयः,न्यूदेल्ली,

**Article Info**
Volume 4 Issue 5
Page Number: 01-15

**Publication Issue :**
September-October-2021

**Article History**
Accepted : 01 Sep 2021
Published : 03 Sep 2021

शोधसारः- वेदान्तशास्त्रं नाम उपनिषत्प्रमाणं तदुपकारकाणि शारीरकसूत्रादीनि। तानि सर्वाणि जीवस्य स्वरूपं ब्रह्माभिन्नमात्मानं प्रतिपादयन्ति। योगशास्त्रम् अन्तःकरणस्य समाधिद्वारा कैवल्यं प्रतिपादयति। आयुर्वेदशास्त्रं शरीरस्य मनसः च स्वास्थ्यसंरक्षणाय उपायान् प्रदर्शयन्, साधकं मोक्षमार्गे नयति। एवं च एषां त्रयाणामपि शास्त्राणां लक्ष्यं परमपद-अवाप्तिरेव इति गम्यते। परमपद-अवाप्तये अन्तःकरणमपि प्रधानं कारणं भवति। अन्तःकरणस्य वृत्तयः अखण्डब्रह्माकारेण परिणताः कारणानि भवन्ति। तत्र विशेषेण योगशास्त्रे वृत्तीनां पञ्चान् विभागान् कृत्वा चिन्तनं क्रियते। अस्मिन् शोधपत्रे योगशास्त्रेकृताः वृत्तीनां पञ्चापि विभागाः वेदान्तशास्त्रदृष्ट्या विचार्यन्ते। तेन सह तेषु विभागेषु आयुर्वेदशास्त्रस्यापि विचाराः अत्र विमृश्यन्ते। अस्य शोधप्रबन्धस्य अध्ययनेन अन्तःकरणवृत्तिविषये त्रयाणामपि शास्त्राणां वादाः, एकमत्यं विरोधाश्च ज्ञाताः भवन्ति। अपि च श्रुति-युक्ति-अनुभवैः कस्य मतस्य प्रामाण्यं स्वीकर्तुं शक्यमित्यपि प्रबन्धेन अनेन ज्ञातुं शक्यते। एवं शोधप्रबन्धमिदं लोकोपयोगाय भवतु इति इत्याशासे।

कुञ्चिकाशब्दाः - वेदान्तः, योगः, अयुर्वेदः, आत्मा, जीवः, ब्रह्म, अविद्या, मिथ्या, अन्तःकरणम्, वृत्तिः, प्रमाणम्, प्रत्यक्षम्, अनुमानम्, उपमानम्, आगमः, अर्थापत्तिः, अनुपलब्धिः, विपर्ययः, विकल्पः, निद्रा, स्मृतिः, अध्यासः, बन्धः, कैवल्यम्, मोक्षः

**पीठिका** –जीवस्य बाह्यप्रपञ्चज्ञानार्थं चक्षुरादिभ्यः निर्गताः अन्तःकरणस्य वृत्तयः कारणानि भवन्ति। तस्य एव जीवस्य मुक्तये ते वृत्तयः अखण्डब्रह्माकारेण परिणताः कारणानि भवन्ति। विशेषेण योगशास्त्रे वृत्तीनां पञ्चान् विभागान् कृत्वा चिन्तनं क्रियते। अस्मिन् शोधपत्रे योगशास्त्रेकृताः वृत्तीनां पञ्चापि विभागाः वेदान्तशास्त्रदृष्ट्या विचार्यन्ते। तेन सह तेषु विभागेषु आयुर्वेदशास्त्रस्यापि विचाराः अत्र विमृश्यन्ते।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

## अन्तःकरणवृत्तीनां विषये वेदान्त-योग-आयुर्वेदशास्त्राणां विचाराः

अन्तःकरणस्य विषयाकारेण परिणामाः, अन्तःकरणास्य धर्माः, कार्यानुसारं तस्य अवस्थाविशेषाः वा वृत्तयः इति वेदान्तशास्त्रे अभिधीयन्ते। एकस्येव अन्तःकरणस्य मनः बुद्धिः अहङ्कारः चित्तमिति इति अवस्थाविशेषाः वृत्तिपदाभिधानाः वेदान्तिभिः प्रतिपाद्यते। उक्तं च - "मनोबुद्धिरहङ्कारः चित्तं करणमान्तरं।

संशयो निश्चयो गर्वः स्मरणं विषया अमी॥"[1]। किन्तु न केवलं ते एव अवस्थाविशेषाः अन्तःकरणस्य भवन्ति, अपितु कामादयः अपि मनसः अवस्थाविशेषाः अन्तःकरणधर्मत्वनाम्ना अपि अभिधीयमानाः वृत्तयः उपनिषत्सु निर्दिश्यन्ते। उपदिष्टं च बृहदारण्यके – "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येततस्तर्वं मनः एव"[2] इति। किञ्च "हस्तादयस्तु स्थितेऽतो नैवम्"[3] इति सूत्रस्य भाष्ये अपि "मनस्त्वेकम् अनेकवृत्तिकम्" इति स्पष्टं मनसः अनेकवृत्तिमत्वं निर्दिष्टम्।

अन्तःकरणस्य परिणामाः अपि वृत्तिशब्देन निरूपिताः वेदान्तशास्त्रे। प्रत्यक्षज्ञानार्थम् अन्तःकरणवृत्यवच्छैन्नचैतन्यस्य विषयावच्छिन्नचैतन्यस्य अभेदः कारणमिति वेदान्तमतम्[4]। एवमुभयावच्छिन्नचैतन्ययोः अभेदः उपाध्योः वृत्ति-विषययोः एकदेशस्थत्वे एव भवति। किन्तु विषयाः न अन्तःकरणं प्रविशन्ति, किन्तु अन्तःकरणमेव चक्षुरादिद्वारा विषयदेशं गत्वा विषयाकारेण परिणमते। सः परिणामः अपि वृत्तिशब्देन उच्यते। उक्तं च - "तैजसमन्तःकरणं चक्षुरादिद्वारा निर्गत्य घटादिविषदेशं गत्वा घटादिविषयाकारेणपरिणमते। स एव परिणामः वृत्तिरित्युच्यते"[5] इति। एवं कामादयः अन्तःकरणधर्माः, घटादिविषयाकारेण अन्तःकरणस्य परिणामाश्च वृत्तिपदेन अभिधीयन्ते।

आयुर्वेदशात्रे अपि मनसः वृत्तयः एवं निरुपिताः-

"चिन्त्यं विचार्यम् ऊह्यञ्च ध्येयम् सङ्कप्लमेव च।

यत्किञ्चित् मनसो ज्ञेयं तत्सर्वं ह्यर्थसंज्ञकम्॥"[6] इति। यत् मनः नानाविषयगतं चिन्तयति तत् चिन्त्यम्। पूर्वानुभवानां पुनःस्मरणं इति यावत्। चिन्तनादेव अन्तःकरणस्य चित्तमिति अभिधानम्। सेन्द्रियेण मनसा ध्येयं वा चिन्त्यमुच्यते। यत् गुणतो दोषतो वा अन्तःकरणेन विचार्यते तत् विचार्यम्। गुणदोषविचारेण च स्वीकार्यम् अस्वीकार्यं च किमिति अन्तःकरणं स्पष्टयते।

---

[1] वे.परि.विषपरिच्छेदः

[2] बृ.उ १/५/३

[3] सू.भा २/४/६

[4] वे.परि.प्रत्यक्षपरिच्छेदः

[5] वे.परि.प्रत्यक्षपरिच्छेदः

[6] च.सं.श.१/२०

अथवा विचारेण विविधतर्केण च यत् ज्ञायते तत् विचार्यम् । विचारितस्य विषयस्य तर्केण मननमूह्यम्। अर्थेभ्यः बहिरिन्द्रियाणि निवर्त्य मनो यत् चिन्तयति तत् ध्यानीयम्। अन्तःकरणं यत् सम्यक् कल्पयति विचारेण तत्संङ्कल्प्यम्। अथवा गुणवत्तया दोषवत्तया वा अवधारणीयम्। इन्द्रियानपेक्षं सत् ज्ञेयं सुख-दुःख-इच्छा-द्वेष-प्रयत्न-ज्ञान-चेतना-स्मृति-अहङ्कारादिकम् मनसः ज्ञेयमुच्यते।

अन्तःकरणस्य वृत्तीनां विषये स्पष्टः विभागः योगशास्त्रे उपलभ्यते, "अथ योगानुशानम्"[7] इति आरभ्य "योगः चित्तवृत्तिनिरोधः"[8] इति चित्तवृत्तिनिरोधरूपस्य योगस्य एव तत्र प्रतिपाद्यमानत्वात्। चित्तवृत्तीनां निरोधः एव तत्र प्रधानः विषयः इतिकृत्वा न सर्वाः वृत्तयः तत्र निरूप्यन्ते, असम्भवात्। प्रागेव दर्शितरीत्या यावन्तः विषयाः तावन्तः वृत्तयः भवन्ति। किन्तु वृत्तीनाम् अज्ञाने तेषां निरोधः अपि न सम्भवति । यच्च पुरुषप्रयत्नसाध्यं तस्य उपदेशेन शास्त्रं सार्थकं स्यात्। चित्तवृत्तीनाम् आनन्त्यात्, पुरुषप्रयत्नेन तासां निरोधः असम्भवः स्यात्। तस्मात् योगशास्त्रे पञ्चप्रकारैः वृत्तीनां संक्षेपणं कृतम्। पञ्चभिः प्रकारैः सर्वेषां वृत्तीनां निरूपणं कर्तुं शक्यम्। ते च - "प्रमाण-विपर्य-विकल्प-निद्रा-स्मृतयः"[9]। अन्तःकरणस्य एते पञ्चवृत्तयः वेदान्तमते अपि अङ्गीक्रियन्ते। उक्तं च – "पञ्चवृत्तिर्मनोवद्व्यपदिश्यते"[10] इति। तत्रैव भाष्ये अचार्याः "एवं तर्हि परमतप्रतिषिद्धमनुमतं भवति इति न्यायात् इहापि योगशास्त्रप्रसिद्धाः मनसः पञ्चवृत्तयः परिगृहयन्ते "प्रमाण-विपर्य-विकल्प-निद्रा-स्मृतयः" नाम"[11] इति स्पष्टं योगमतमुल्लिखन्ति। अतः एव तासां प्रमाणादिवृत्तीनां विषये वेदान्ताभिमतं, योगायुर्वेदमतं, तत्र भेदाभेदे च अत्र निरूप्यते।

**प्रमाणवृत्तिः**

अज्ञानविरोधि ज्ञानमेव प्रमाशब्देनापि व्यवह्रियते। "सत्यं ज्ञानमन्तं ब्रह्म"[12] इति श्रुतेः ज्ञानस्वरूपं चैतन्यमेव प्रमाशब्देन उच्यते। प्रमायाः असाधारणं कारणं प्रमाणं भवति। उक्तं च "तत्र प्रमाकरणं प्रमाणम्"[13] इति। अन्तःकरणपरिणामरूपा वृत्तिरेव प्रमाजनने असाधारणं कारणम्। अतः प्रमायाः करणम् अन्तःकरणवृत्तिः प्रमाणं भवति। वेदान्तमते षट् प्रमाणानि स्वीकृतानि,

---

[7] यो.सू १/१

[8] यो.सू १/२

[9] यो.सू १/६

[10] ब्र.सू २/४/१२

[11] सू.भा २/४/१२

[12] तै.उ २/१/१

[13] वे.परि.प्रत्यक्षपरिच्छेदः

प्रत्यक्ष-अनुमान-उपमान-शब्द-अर्थापत्ति-अनुपलब्धिभेदात्। सर्वत्र अपि स्वाकारवृत्यभिव्यक्तचैतन्यस्य एव प्रमात्वम्, तज्जनकतया वृत्तेः प्रमाणत्वम्, वृत्तिविषययोः सम्बन्धस्य व्यापारत्वम्। तथापि प्रत्याक्षादिभेदः वृत्तिजनककारणभेदात्। प्रत्यक्षे तु इद्रियार्थसन्निकर्षः वृत्तिजनने कारणम्, अनुमाने व्याप्तिज्ञानं कारणमित्येवं वृत्तिजनकत्वभेदेन प्रत्यक्षादिभेदः। अतः सर्वासु प्रत्यक्षादिप्रमासु अन्तःकरणवृत्तेरेव प्रमाणमविशेषेण।

**प्रत्यक्षप्रमाणम् -** घटादीनां बाह्यवस्तूनां दर्शनादिना अन्तःकरणवृत्तयः तद्देशं गत्वा तद्वस्त्वाकारेण परिणमन्ते। वेदान्तमते सर्वं चैत्यन्यब्रह्मसृष्टिः इति हेतोः सर्वत्र चैतन्यं भवत्येव। यद्यपि चैतन्यमद्वितीयं, तथापि उपाधिवशात् घटावच्छिन्नम्, अन्तःकरणावच्छिन्नमित्यादिव्यवहारः सम्भवति। एवं घटादीनां प्रत्यक्षस्थले घटादिवस्त्वच्छिन्नं विषयचैतन्यं तद्वृत्यवच्छिन्नं प्रमाणचैतन्यं च एकीभवति। उपाध्योः एकदेशस्थत्वे सति एककालीनत्वस्य उपधेय-अभेदप्रयोजकत्वात्[14]। एवं च चैतन्याभेदेन अभिव्यक्तं घटाद्यच्छिन्नं चैतन्यं प्रत्यक्षमुच्यते। तदा "अयं घटः" इति प्रत्यक्षज्ञानं भवति। एवमेव सुखादीनाम् अन्तःकरणधर्माणामपि चैतन्याभेदेन एव प्रत्यक्षानुभवः सम्भवति। लक्षणं च उक्तं - "योग्यवर्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वम्"[15] इति। न केवलं अयं घटः इत्यादि ज्ञानं प्रत्यक्षम् अपि तु तत्र विषयीभूताः घटादयः विषयाः अपि प्रत्यक्षाः। तत्र घटादिविषयावच्छिन्नचैतन्यस्य अन्तःकरणावच्छिन्न- प्रमातृचैन्तन्यस्य च अभेदः कारणम्। किञ्च अध्यस्तस्य अधिष्ठानसत्तातिरिक्तसत्ताकत्वं नास्ति इतिकारणात् घटादिविषयाणां चैतन्ये अध्यस्तानां चैतन्यसत्तातिरिक्तसत्ताकत्वं नास्ति। यदा वृत्तिद्वारा अन्तःकरणवृत्यवच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्यस्य च अभेदः भवति, तदा यत्र चैतन्ये अन्तःकरणमध्यस्तं तत्रैव घटादिविषयाः अपि अध्यस्ताः इति हेतोः अन्तःकरणवच्छिन्न-चैतन्यातिरिक्त-सत्ताकत्वं घटादीनां नास्ति। इदमेव घटादीनां विषयाणां प्रत्यक्षत्वम्। उक्तं च- "स्वाकार-वृत्युपहित-प्रमातृचैतन्य-सत्ता-अतिरिक्तसत्तकत्व-शून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वम्"[16] इति।

**अनुमानम् -** अनुमितेः असाधारणं कारणम् अनुमानम्। उक्तं च - "अनुमितिकरणमनुमानम्"[17] इति। अनिमितौ व्याप्तिज्ञानं करणमिति तदेव अनुमानशब्देन अभिधीयते। व्याप्तिज्ञानञ्च पूर्वानुभवसंसाकरस्य उद्बोधेन भवति। अतः व्याप्तिज्ञाने तत्संस्कारः

---

[14] वे.परि.प्रत्यक्षपरिच्छेदः

[15] वे.परि.प्रत्यक्षपरिच्छेदः

[16] वे.परि.अनुमानपरिच्छेदः

[17] वे.परि.प्रत्यक्षपरिच्छेदः

अवान्तरव्यापारः इति प्रतिपादितम् [18] । एवं च अयं धूमवानिति पक्षधर्मता ज्ञानान्तरं धूमः वह्निव्याप्यः इति अनुभवजन्यव्याप्तिसंस्कारः जागृतः भवति। ततः अयं वह्निमानिति अनुमितिः भवति। तस्मादनुमाने अपि अन्तःकरणसंस्कारः कारणं भवति इति अनुमानमपि अन्तःकरणवृत्तिविशेषः इति सिद्धम्।

**उपमानम् -** सादृश्यप्रमाकरणमुपमानम्[19]। गोपालकः कश्चन वनं गतः गवयं दृष्ट्वा "अयं पिण्डः गोसदृशः" इति इति ज्ञानं प्राप्नोति। अनेन उपमानेन अप्रत्यक्षे गवि भवति सादृश्यप्रमा उपमितिः "अनेन सदृशी मदीया गौः" इति। अत्र गवयप्रत्यक्षे, सादृश्यस्मरणे अस्ति अन्तःकरणस्य अपेक्षा इति अन्तःकरणवृत्तित्वमुपमानस्य उपपद्यते।

**आगमः -** यस्य वाक्यस्य तात्पर्यभूतः विषयः प्रमाणान्तरेण न बाध्यते तद्वाक्यं प्रमाणमुच्यते[20]। वाक्यजन्यज्ञाने आकाङ्क्षा योग्यता आसत्तिः तात्पर्यं चेऽति चत्वारि कारणानि[21]। तत्र तात्पर्यं नाम वक्तुः विविक्षितम् अर्थं जनयितुं वाक्यस्य योग्यता। तात्पर्यनिर्णयश्च उपक्रामदिभिः लिङ्गैः भवति। एवमागमप्रमाणमपि मनोव्यापाराधीनमिति अस्य अन्तःकरणवृत्तित्वमुपपद्यते।

**अर्थापत्तिः -** "उपपाद्यज्ञानेन-उपपादक-कल्पनमर्थापत्तिः"[22]। उदाहरणार्थं दिवा अभुञ्जानस्य देवदत्तस्य पीनत्वेन रात्रिभोजनं कल्प्यते। अत्र पीनत्वं उपपाद्यं, तेन यत्कल्प्यते रात्रिभोजनं तदुपपादकम्। अत्र पीनत्वं पत्यक्षमिति अन्तःकरणापेक्षा, रात्रिभोजनकल्पना अपि मानासः व्यवहारः इति तत्रापि अन्तःकरणापेक्षा अस्तीति अन्तःकरणवृत्तित्वमर्थापत्तेः उपपद्यते।

**अनुपलब्धिः -** अभावानुभवस्य असाधारणं कारणम् अनुपलब्धिप्रमाणम्। यच्च अभावज्ञानम् अनुमान-उपमान-आगम-अर्थापत्तिरूपज्ञानप्रमाणैः उत्पद्यते न तदत्र ग्राह्यम्। किञ्च इदम् अभावज्ञानं नापि इन्द्रियार्थसन्निकर्षद्वारा घटादिविषयाकारपरिणामक्रमेण वा उत्पद्यते। कदापि अविद्यमानं किञ्चिद् इन्द्रियैः संसृष्टं न स्यात्। अतः अयम् अभावानुभवः प्रत्यक्षप्रमाणेनापि न उत्पद्यते। उक्तं च - "ज्ञानकरण-अजन्याभाव-अनुभव-असाधारणकरणम् अनुपलब्धिरूपं प्रमाणम्"[23] इति। घटादीनां प्रत्यक्षयोग्यानां विषयाणामेव अभावज्ञानम् अनुपलब्धिप्रमाणेन भवति। अत उच्यते अभावस्य यः प्रतियोगी स तर्कितः स्यात्। उक्तं च -"तर्कित-प्रतियोगिसत्वप्रसञ्जित-प्रतियोगिकत्वम्"[24] इति। तर्कश्च "इदं वस्तु यदि अत्र स्यात्, तर्हि उलभ्येत, न

---

[18] "तत्संस्कारो अवान्तरव्यापारः" – वे.परि.अनुमानपरिच्छेदः

[19] वे.परि.उपमानपरिच्छेदः,

[20] "यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्" – वे.परि.आगमप्रमाणम्

[21] **अकाङ्क्षा** - "पदार्थानां परस्परजिज्ञासाविषययोग्यत्वमाकाङ्क्षा", **योग्यता** – " तात्पर्यविषयीभूतसंसर्गाबाधः", **आसत्तिः** – " अव्यवधानेन पदजन्यपदार्थोपस्थितिः", **तात्पर्यम्** - "यत्प्रतीतिजननस्वरूपयोग्यत्वे सति यदन्यप्रतीति-इच्छया नोच्चरितत्वम्" – वे.परि आगमपरिच्छेदः

[22] वे.परि.अर्थापत्तिपरिच्छेदः

[23] वे.परि.अनुपलब्धिपरिच्छेदः

[24] वे.परि.अनुपलब्धिपरिच्छेदः

उपलभ्यते, अतः नास्ति" इत्येवं रूपः। एवं यस्य प्रतियोगिनः तर्कितत्वं सिध्यति तस्य अभावः अनुपलब्धिप्रमाणेन वक्तुं शक्यते। अयं च अनुपलब्धिप्रमाणेन जन्यः अभावानुभवः प्रत्यक्षः एव। किन्तु अस्य अभावप्रत्यक्षस्य प्रमाणं तु न प्रत्यक्षं किन्तु अनुपलब्धिः। यतः अभावाकारवृत्तिः विषयाकारवृत्तिः च परस्परं विजातीये। विषयाकारवृत्तिः बाह्येन्द्रियसन्निकर्षजन्यम्, अभावाकारवृत्तिस्तु न तथा। किन्तु वृत्तिस्तु जायते इति हेतोः अन्तःकरणसम्बन्धः अनुपलब्धिप्रमाणे अपि भवत्येव।

योगिनां अयुर्वेदिनां च मते त्रीण्येव प्रमाणानि उक्तानि तानि च प्रत्यक्षानुमानागमरूपाणि। उक्तं च - प्रमाणानि योगमते त्रीणि "पत्यक्ष-अनुमान-आगमाः प्रमाणानि"[25] इति। तान्यपि अन्तःकरणवृत्तिरूपाण्येव इति प्राक् निरूपितमेव। यद्यपि प्रमाणानां संख्याविषये, तेषां स्वरूपेषु वैम्यत्यं दृष्टं वेदान्तिनां योगिनामायुर्वेदिनां च तथापि तेषाम् अन्तःकरणवृत्तिरूपत्वे नास्ति वैमत्यम्।

**विपर्ययवृत्तिः**

अतस्मिन् तद्बुद्धिः भ्रमः इत्युच्यते। अयमेव मिथ्या, अध्यासः, विपर्ययः, प्रतिभासः, अविद्या, अज्ञानम् इत्यादिशब्दैः व्यवह्रियते। उक्तं च - "अध्यासो नाम अतस्मिन् तद्बुद्धिरित्यवोचाम"[26] इति। शुक्तौ रजतभ्रमः, रज्जौ सर्पभ्रमः इत्यादिः भ्रमस्य उदाहरणानि। प्रातिभासिकं शुक्तिरजतादिकमुत्पद्यते इति वेदान्तिनः। तत्रेवं प्रकिया - काचकामलादिनेत्रदोषवान् पुरुषः पुरोवर्ति शुक्तिं पश्यति। तदा इदमाकारा अन्तःकरणवृत्तिः उदेति। शुक्तौ चाकचिक्यं च भवति इत्यतः, तस्यामेव इदमाकारवृत्तौ चाकाचिक्यं च अन्तर्गतं भवति। तदुत्तरं चक्षुषः तद्वस्तुसंयोगात् बहिः निस्सृता अन्तःकरणवृत्तिः चाकचिक्यसहित-इदमाकारविषयमावृणोति। उपाध्योः एकदेशस्थत्वेन उपधेययोः अभेदः सम्भवति इत्यतः इदमाकारान्तःकरणवृत्यवच्छिन्नं चैतन्यं, प्रामातुः सकाशात् बहर्निर्गत-अन्तःकरणवृत्यवच्छिन्नं चैतन्यम्, अन्तःकरणावच्छिन्नं चैतन्यं च अभिन्नं भवति। तदा इदमकारविषये या शुक्तिविषयिणी अविद्या सा रजतज्ञानाकारेण परिणमते। अथवा तत्र शुक्तिविषयक-अज्ञानात् प्रातिभासिकं रजतमुत्पद्यते। किञ्च शुक्तौ सर्वदा प्रातिभासिकरजतमेव उत्पद्येत इति नास्ति नियमः। पुरुषस्य अविद्या यादृशसंस्कारसहिता भवति तादृशमेव अनिर्वचनीयं यत्किञ्चित् तत्र उत्पद्यते। अतः कदाचित् शुक्तौ रजतभ्रमः, कदाचित् रङ्गभ्रमः स्यात्।

योगिनः विपर्ययस्य अन्तःकरणवृत्तित्वं वदन्ति इति प्राक् दर्शतम्। ते "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्"[27] इति वदन्तः वेदान्तसम्मतमेव मिथ्याज्ञानस्य स्वरूपं प्रतिपादयन्ति। विपर्ययस्य मिथ्याज्ञानत्वं सूत्रे एव प्रकाशितम् "अतद्रूपप्रतिष्ठम्" इति। तस्य

---

[25] यो.सू १/७

[26] अ.भा

[27] यो.सू १/८

अर्थस्य यद्रूपं तस्मिन् रूपे न प्रतितिष्ठति। तस्य अर्थस्य यत् पारमार्थिकं रूपं न तत् प्रकाशयति इत्यर्थः। उक्तं च - "अतथाभूते अर्थे तथा उत्पद्यमानं ज्ञानं विपर्ययः। यथा शुक्तिकायां रजतज्ञानम्"[28] इति।

इदं मिथ्याज्ञानं विपर्ययः अधिष्ठानज्ञानेन बाध्यते। अधिष्ठानज्ञानं तु प्रमाणवृत्या भवति। यथा शुक्तिज्ञानेन प्रातिभासिकं रजतं, एकचन्द्रदर्शनेन द्विचन्द्रदर्शनं बाध्यते तथा। बाधः नाम उपादानेन सह कार्यनिवृत्तिः। उक्तं च - "कार्यनाशो हि द्विविधः - कश्चिदुपादानेन सह, कश्चिद्विद्यमाने एव उपादाने।आद्यो बाधः। द्वतीयस्तु निवृत्ति" [29] इति। प्रातिभासिक-रजतस्य अधिष्ठानभूतशुक्तिज्ञानेन, प्रातिभासिकरजतस्य उपादानं शुक्तिप्रकारकमज्ञानं, तत्कार्यभूतं प्रातिभासिकरतं च बाधितं भवति। यथा शुक्तौ रजतम् अध्यस्यते एवमेव ब्रह्मणि प्रपञ्चः अध्यस्यते।

किन्तु मिथ्याज्ञानस्य अन्तःकरणवृत्तित्वं तु न वेदान्तिभिः अङ्गीक्रियते। मिथ्याज्ञानमविद्यावृत्तिरेव। आचार्याः अपि भ्रमस्य अन्तःकरणवृत्तित्वप्रतिपादकयोगमते अरुचिं प्रदर्श्य एव "बहुवृत्तित्वमात्रेण वा मनः प्राणस्य निदर्शनमिति द्रष्टव्यम्"[30] इति मनसः पञ्चवृत्तिकत्वनिदर्शनम् अन्यप्रकारेण व्याख्यानं कुर्वन्ति[31]। अथवा स्वकारण-अविद्यात्मना अन्तःकरणवृत्तित्वं भ्रमस्य योजनीयम्।

अतद्रूपप्रतिष्ठमित्यनेन संश्यस्यापि ग्रहणं करणीयम्। संशये अपि एकस्मिन् विषये बुद्धेः प्रतिष्ठानं न भवति इति हेतोः संशयः अपि अतद्रूपप्रतिष्ठः एव। उक्तं च – "अतद्रूपप्रतिष्ठता च संशये अपि अस्ति, तस्य एकाप्रतिष्ठानात्। अतः सोऽपि सङ्गृहीतः"[32] इति।

एवं मिथ्याज्ञानस्य स्वरुपे वेदान्तयोगयोः ऐकमत्ये सत्यपि तस्य अन्तःकरणवृत्तित्वे अस्ति विरोधः इति ज्ञातव्यम्। किन्तु संश्यस्य तु अन्तःकरणवृत्तित्वं तु वेदान्तसम्मतः एव। "विचिकित्सा"[33] इति अन्तःकरणधर्मत्वेन संशयस्य स्पष्टं श्रुतौ निर्देशात्।

## विकल्पवृत्तिः

यत् वस्तु अत्यन्तमेव अविद्यमानं तत् विकल्पः उच्यते। वेदान्तमते अनेनैव अभिप्रायेण असत्, तुच्छम् इत्यादिपदानि प्रयुक्तानि। उक्तं च –

"असतो मायया जन्म तत्वतो नैव युज्यते।

---

[28] भोजवृत्तिः १/८

[29] वे.परि.प्रत्यक्षपरिच्छेदः

[30] सू.भा २/४/१२

[31] "भ्रमनिद्रयोः अविद्यावृत्तित्वात् न मनोवृत्तित्वम् इति अरुच्या स्वमतमाह" – भाष्यरत्नप्रभा २/४/१२

[32] भामती २/४/१२

[33] बृ.उ १/५/३

वन्ध्यापुत्रो न तत्वेन मायया वाऽपि जायते॥[34] इति। अपि च "कथमसतः सज्जायेतेऽति"[35] इति मन्त्रभाष्ये आचार्याः अभावात् भावोत्पत्तिः असाध्यमिति निर्णयं चक्रुः। अतः अन्त्यमेव निःस्वरूपम्[36] निरात्मकम्[37] अत्यन्ताभावप्रतियोगी शशविषाणादिकं विकल्पः असत् तुच्छमिति वा उच्यते। एवं विषयशून्या अन्तःकरणवृत्तिमात्रमयं विकल्पः।

योगशास्त्रे अपि "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः"[38] इति विकल्पवृत्तेः निरूपणं कृतम्। राहोः शिरः,वन्ध्यासुतः, खपुष्पं, मृगतृष्णा, शशशृङ्गः इत्यादीनां शब्दानां श्रवणानन्तरं निर्विषया वृत्तिः या उदेति सा विकल्पः इति उच्यते। विकल्पे विषयवस्तुनः अभावे अपि शब्दज्ञानेन एव शशशृङ्गः, राहोःशिरः इत्यादिव्यवहारः भवति। उक्तं – "वस्तुशून्यत्वे अपि शब्दज्ञानमाहात्म्यनिबन्धनो व्यवहारः दुश्यते"[39] इति।

राहोः शिरः इति वाक्येन राहुसम्बद्धः शिरः इति तयोः भेदवृत्तिः उदेति। अत्र अवयवी राहुः,तस्य अवयवं शिरः इति अवयवि-अवयवभावः सम्बन्धः। किन्तु राहुरेव शिरः इति हेतोः अवयवी-अवयवौ अत्र न स्तः। अतः अत्र विकल्पवृत्तिः। एवमेव ब्रह्मणः "सच्चिदान्दं ब्रह्म" इति लक्षणे विशेष्यविशेषणसम्बन्धः द्दश्यते चेदपि, सच्चिदान्दमेव ब्रह्म इति हेतोः विशेष्यविशेषत्वरूपभेदः केवलं शब्दमात्रं "भेद"वस्तुशून्यम् विकल्पः एव। एवमस्मिन् विषये वेदान्तिनां योगिनां च समानमतम् अवलोकितुं शक्यते।

### निद्रावृत्तिः- सुषुप्तम्

योगिनः "अभावप्रत्ययालम्बना वृत्तिः निद्रा"[40] इति निद्रावृत्तिं सूत्रयन्ति। वस्तूनाम् अभावः आवरकस्य तमसः प्राचुर्ये भवति। सः अभावः यत्र विषयः सा निद्रावृत्तिः उच्यते योगमते। जाग्रत्कालीनसत्ववृत्तीनां स्वप्नकालीनरजोवृत्तीनां च आवरकं तमोरूपमज्ञानम्, तदज्ञानविषयिणी वृत्तिः निद्रा। सा च निद्रावृत्तिः सुषुप्तमेव। सुप्तोत्थितस्य सुखमहमस्वाप्समतः प्रसन्नं मे मनः, दुःखमहमस्वाप्सं स्त्यानं मे मनः , गाढं मूढमहमस्वाप्सं गुरूणि मे गात्राणि क्लान्तं मे चित्तमित्यादि स्मृतिः भवति। तच्च तत्कालीन-अनुभवाभावे न सिध्यति। तस्मात् अन्तःकरणवृत्तिविशेषः सुषुप्तापरपर्यायः निद्रा इति योगिनः। सुषुप्तौ अन्तःकरणं स्वरूपचैतन्यम् अज्ञानं च विषयीकरोति इति हि तेषां वादः।

---

[34] मां.का ३/२८

[35] छा.उ ६/२/२

[36] "असतः निःस्वरुपस्य" - आनन्दगिरी २/३/९

[37] "नाप्यसतः निरात्मकत्वात् - सू.भा २/३/९

[38] यो.सू १/९

[39] व्यासभाष्यम् १/९

[40] यो.सू १/१०

वेदान्तमतानुसारं सुषुप्तं न चित्तवृत्तिरूपम्। प्रश्नोपनिषदि "स यदा तेजसा अभिभूतो भवति"[41] इति सुषुप्तेः वर्णनं कृतम्। विवृतं च शाङ्करभाष्ये – "स यदा मनोरुपो देवः यस्मिन् काले सौरेण पित्ताख्येन तेजसा नाडीशयने सर्वतो अभिभूतो भवति तिरस्कृतवासनाद्वारो भवति तदा सह करणैः मनसो रश्मयः हृद्युपसंहृताः भवन्ति"[42] इति। "पित्ताख्यतेजसा" इति वदता आयुर्विज्ञानद्वारा आचार्याः सुषुप्तिं वर्णयन्ति। तदा पित्तं सर्वान् विषयपलब्धिस्थानान् आवृणोति, अतः न किञ्चित् विषयविशेषविज्ञानं भवति। न तस्मिन् काले कामादयः मनोवृत्तयः भवन्ति, न वा मनः स्वप्नान् पश्यति। जागरितवत् विषयोपलब्धिस्तु तदा दूरे एव अपास्तम्। उक्तं च – "यत्र सुप्तः न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्"[43] इति। यथा अश्वत्थादिकाष्ठे सर्वं काष्ठम् अभिव्याप्य अग्निः वर्तते, मन्थदण्डेन यत्र मथनं क्रियते तत्रैव अग्निः अभिव्यज्यते। एवमेव सुषुप्तौ मनः अखिलं शरीरं व्याप्य तिष्ठति। उक्तं च – "यदा मनो दार्वाग्निवदविशेषविज्ञानरूपेण कृत्स्नं शरीरं व्याप्य अवतिष्ठते तदा सुषुप्तो भवति[44] इति। व्याप्य तिष्ठति इत्यस्य अन्तःकरणं निर्विशेषं भवति इत्यर्थः। तदा सर्वाणि स्थूलानि भूतानि, तन्मात्राणि, बुद्धीन्द्रियाणि, कर्मेन्द्रियाणि, अन्तःकरणं प्राणादिवायवः अपि परे अक्षरे सम्प्रतिष्ठन्ते[45]। उक्तं च - "सता सोम्य तदा सम्पन्नो भवति, "तेजसा हि तदा सम्पन्नो भवति", "यः एषोऽअन्तहृदये आकाशस्तस्मिन् शेते"[46] इति। अपि च "तदभावो नाडीषु तच्छ्रुतेरात्मनि च"[47] इति सूत्रे पुरीतति यत् ब्रह्म तत्र जीवस्य तात्कालिकमैक्यं सुषुप्तिः इति निर्णयः कृतः। आनन्दस्वरूपस्य ब्रह्मणः ऐक्यसिद्धेः एव तस्मिन् काले समग्रे शरीरे सुखानुभूतिः भवति। उक्तं च – "अथ तदैतस्मिन् शरीरे एतत्सुखं भवति", "आनन्दभुक्

---

[41] प्र.उ ४/३

[42] प्र.भा ४/६

[43] मां.उ १/५

[44] प्र.भा ४/६

[45] "स यथा सोम्य वयांसि वासोवृक्षं सम्प्रतिष्ठन्ते। एवं ह वै तत्सर्वं परे आत्मनि सम्प्रतिष्ठते॥", "पृथिवी च पृथिवीमात्रा चाऽपश्चाऽपोमात्रा च तेजश्च तेजोमात्रा च वायुश्च वायुमात्रा चाऽकाशश्चाऽकाशमात्रा च चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसश्च रसयितव्यं च त्वक्च स्पर्शयितव्यं च वाक्च वक्तव्यं च हस्तौ च आदातव्यं चोपस्थश्चानन्दयितव्यं च पायुश्च विसर्जयितव्यं च पादौ च गन्तव्यं च मनश्च मन्तव्यं च बुद्धिश्च बोद्धव्यं चाहङ्कारश्चाहङ्कर्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च -प्राणश्च विधारयितव्यं च॥" - प्र.उ ४/ ७-८

[46] छा.उ ६/८/१, छा.उ ८/६/३, बृ.उ २/१/१९

[47] ब्र.सू ३/२/७

चेतोमुखः प्राज्ञः", "आनन्दभुक् तथा प्राज्ञः", "सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेति"[48] इति। अतः एव सुषुप्तेः उत्थितस्य "सुखमहं अस्वाप्सं न किञ्चित् अवेदिषम्" इति आनन्दानुभवः भवति।

शान्तेषु समनस्केषु इन्द्रियेषु सत्सु अपि जीवः आनन्दमनुभवति। तदा जीवः चैतन्ये प्रतिबिम्बिताभिः अतिसूक्ष्माविद्यावृत्तिभिः आन्दमनुभवति। उक्तं च – "तदानीम् ईश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिः अतिसूक्ष्माभिः अज्ञानवृत्तिभिः आनन्दमनुभवतः"[49]। सुषुप्तादुत्थितस्य "न किञ्चिदवेदिषमिति" इत्यपि उत्थितस्य अनुभवेण, तदा अन्यवृत्तीनामभावात् अज्ञानानुभवमात्रं स्मर्यते इति ज्ञातव्यम्। अतः सुषुप्तौ यत्सुखमनुभूयते इति प्रतिपादितं तत् मेघावृतसूर्यवत् अविद्यावृतस्वरूपसुखमेव इति विज्ञेयम्। किञ्च वेदान्तपरिभाषायां स्पष्टं सुषुप्तस्य लक्षणमुक्तं -"सुषुप्तिर्नाम अवुद्यागोचर-अविद्यावृत्त्यवस्था"[50] इति। जागृदवस्थायां स्वप्नावस्थायां च "घटः अज्ञातः" इत्यादिषु अन्तःकरणवृत्तिरूपा अविद्यावृत्तिः। सुषुप्तौ तु अविद्यारूपेण एव अविद्यावृत्तिः इति विशेषः। अतः योगमतोक्तरीत्या सुषुप्तेः चित्तवृत्तित्वं तु नैव भवति।

"वाचारम्भणं विकारः मृत्तिकेत्येव सत्यम्"[51] इति कार्यम् उपदानादभिन्नमिति श्रुतिषु दृश्यते इत्यतः। अतः सुषुप्तेः चित्तवृत्तित्वं स्वकारणात्मना अज्ञानेन इति योजयितुं शक्यते। तदभिप्रायेण सुषुप्तेः चित्तवृत्तित्वं वेदान्तविरुद्धं न भवति। किन्तु सुषुप्तेः उत्थितस्य "दुःखमहमस्वाप्सं स्त्यानं मे मनः , गाढं मूढमहमस्वाप्सं गुरूणि मे गात्राणि क्लान्तं मे चित्तमित्यादद्यनुभवः योगिभिः निरुपितः तु अप्रामाणिकः। सुषुप्तौ अज्ञानवृत्तिमात्रसद्भावात्, तस्य च तन्मते एव सत्वरजस्तमोगुणानां साम्यावस्थात्वेन उपाख्यानात्, तदा रजोविकारस्य दुःखस्य, तमो विकारस्य च मोहस्य अनुभवः असङ्गतः। आन्दस्वरुपं चैतन्यमात्रं अज्ञाने प्रतिबिम्बते इत्यतः आनन्दानुभवे तु अविरोधः। स्वप्नकाले तु मनसः सर्वाः वासनाः भवन्ति इत्यतः तत्र दुःखादिनामनुभवः, जागरिते च तस्य स्मरणमङ्गीक्रियते एव। अतः स्वप्नकालिकस्य दुःखादेः स्मरणं योगिभिः सुषुप्तौ आरोप्यते इति वक्तव्यं भवति।

सुषुप्तिः सकलकार्यनाशरूपः नित्यप्रलयः इत्यपि उच्यते। उक्तं च - "तत्र नित्यप्रलयः सुषुप्तिः, तस्याः सकलकार्यप्रलयरूपत्वात्"[52] इति। सकलकार्यनाशे पुरुषस्य धर्माधर्मादीनामपि नाशात् उत्थितस्य सुखदुःखादि-अनुभवः न स्यात्, धर्माधर्मयोः विधिप्रतिषेधप्रतिपादकशास्त्रवैयर्थ्यमपि इति शङ्का न कार्या। धर्माधर्मयोः स्वकारणे अज्ञाने संस्काररूपेण विद्यमानत्वात् उक्तदोषौ न भवतः। सर्वार्थप्रवर्तकस्य अन्तःकरणस्य स्वकारणे लये सति प्राणव्यवहारः अपि न स्यात्, अतः

---

[48] प्र.उ ४/६, मां.उ ५, आ.प्र.मं ६/३, कै.मं १३

[49] वे.सारः

[50] वे.परि.विषयपरिच्छेदः

[51] छा.उ ६/४/४

[52] वे.परि.विषयपरिच्छेदः

मरणस्य सुषुप्तस्य भेदः नास्ति इति सन्देहः न कार्यः। अन्तःकरणस्य ज्ञानशक्तिविशिष्टस्य अन्तःकरणस्य एव लयः, क्रियाशक्तिविशिष्टस्य तु न लयः। उक्तं च- "तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशः"[53] इति। अतः प्राणनादिक्रियाः सुषुत्पौ अपि भवन्त्येव। किञ्च "यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राणः एवैकधा भवति, अथैनं वाक् सर्वैर्नामभिः सहाप्येति"[54] इति श्रुतौ सुषुप्ते प्राणोपाधिके आत्मनि लयः दर्शितः। तस्मात् मृतात् सुषुप्तस्य भेदः अस्त्येव।

अतः योगिभिरुक्तरीत्या सुषुप्तं न अन्तःकरणवृत्तिरूपम्। किन्तु सूत्रे कथितरीत्या "अभावप्रत्ययः" इत्यस्य अज्ञानप्रत्ययः इति यदि अभिप्रायः तर्हि तत्र अस्ति वेदान्तसम्मतिः। अथवा स्वकारण-अविद्यात्मना अन्तःकरणस्य वृत्तिः सुषुप्तमित्यत्रापि नास्ति वेदान्तविरोधः।

आयुर्वेदिनः तु यदा अन्तःकरणं निष्क्रियं भवति, इन्द्रियाणि च स्वव्यापारात् विरतानि तदा मानवः निद्राति इति वदन्ति। उक्तं च –

"यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः।

विषयेभ्यः विनिवर्तन्ते तदा स्वपति मानवः॥"[55] इति।

समनस्केन्द्रियाणां विषयेभ्यः निवृत्तिः निद्रा इत्यर्थः। मनःपूर्वक-इन्द्रियाणां निद्राकाले कार्यत्मना अस्तित्वमेव न भवति केवलं स्वकारणात्मना भवति। तस्मात् अविद्यावृत्तिभिरेव तत्र आनन्दानुभूतिः इति निद्रायाः अन्तःकरणवृत्तित्वे आयुर्वेदिनामपि अस्ति विरोधः इति सिद्धम्।

निद्रायाः अवश्यम्भावित्वं चिकित्सकाः प्रतिपादयन्ति। निद्रालाभेण शरीरे सुखं, पुष्टिः, बलं, शुक्रं च वर्धते। ज्ञानेन्द्रियाणि च सम्यग्विषयान् गृह्णन्ति। तेन मिथ्या-विपर्ययदोषौ पुरुषस्य न भवतः। अयुरपि यथाकालं भवति। अर्थात् दुःखम्, कृशता, क्लीबता, विषयस्य अस्पष्टज्ञानमज्ञानं वा, अकालमृत्युश्च न भवति। अनिद्रायां तु तत्सर्वं भवति। निद्रायाः सुखानुभवहेतुत्वेन निद्रायां दुःखानुभवः मोहानुभवश्च कैश्चित् योगाचार्यैः प्रतिपादितं प्रत्याख्यातं भवति।

अकाले स्वापः, अतिनिद्रा, अनिद्रा च सुखं आयुः च हरति। स्वापकालः रात्रिः एव। अतः दिवास्वापः वर्ज्यः। किन्तु ये गायन्तः, अध्ययनं कुर्वन्तः, मद्यं पिबन्तः, मैथुने रताः, संशोधनकर्मणि निरताः,भारं वहन्तः, चलन्तः च श्रान्ताः तेषां दिवास्वापः न निषिध्यते। किञ्च अजीर्णिनाः, क्षतनां, धातुक्षीणानां, वृद्धानां, बालानां, स्त्रीणां, पिपासितानां, अतिसार-शूलरोगयुक्तानां,

---

[53] वे.परि.विषयपरिच्छेदः

[54] कौ.उ ३/२

[55] च.सं.सू २१/३५

श्वासप्रश्वाससमस्यायुक्तानां, हिक्किनाम्, उपरिष्टात् पतितानां, व्रणितानाम्, उन्मत्तानां, प्रयाणेन रात्रिजागरणेन च श्रान्तानां, क्रोधशोकभययुक्तानां च दिवास्वापः योग्यः। किञ्च ये च दिवास्वापः अभ्यस्तः तेऽपि झटिति तस्य परित्यागमपि न कुर्युः। तेऽपि रात्रिस्वापस्य अभ्यासपर्यन्तं दिवाकाले निद्रां कर्तुमर्हन्ति। एतेषां दिवानिद्रया बलवृद्धिः, शरीरपोषणं, स्थिरायुता च सिध्यति। किञ्च ग्रीष्मकाले रात्रिकालः अल्पः इति हेतोः सर्वेषामेव दिवास्वापः योग्यः। अन्यरुऋतुषु तु दिवास्वापेन कफ-पित्तयोः प्रकोपः भवति। किञ्च ये अतीवपीवरतनवः, घृत-दुग्धादि-स्नेहाहारस्वीकारिणः, कफप्रकृतिकाः, कफविकारजन्यरोगयुक्ताः च, विषसेवनेन च दूषिताः न कदापि दिवानिद्रां कुर्युः। रात्रौ बहुकालजागरणेन वातवृद्धिः भवति,दिवास्वापेण कफवृद्धिः भवति।

**निद्रानाशस्य कारणानि** - कायस्य शिरसः च विरेचनं, वमनं, भयशोकचिन्ताः, धूमपानं, व्यायामः, रक्तमोक्षणं, शय्यायाः मनोऽननुकूलत्वं, योगाभ्यासेन सत्वगुणप्रचुरता, तमोगुणस्य जयश्च निद्रानाशहेतवः। अपि च कार्यविशेषनिमग्नस्य, निर्दिष्टस्वापकालव्यतिरेके, रोगार्ते, वात-पित्त-प्रकृतिकस्य च निद्रानाशः भवति।

निद्रानाशवारणाय अभ्यङ्गः, स्नानं, ग्राम्य-अनूप-जलीयपशुपक्षीणां मांसरसस्वीकारः, दधि-सहितं शाल्यन्नभक्षणं, क्षीर-घृत-मदिरासेवनं च कर्तुं शक्यते। मनःसुखमपि निद्रादोषं परिहरति। मनःसुखार्थं इष्टस्य सुगन्धस्य सेवनं शब्दस्य च श्रवणम् विहितम्। किञ्च चक्षुषोः तर्पणं, शिरसः वदनस्य च शीतलद्रव्यलेपः निद्रायां सहकारी। निद्रास्थानमपि सुनिद्रायां कारणं भवति। अतः सुन्दर-स्वच्छ-मनोऽनुकूल पर्यङ्कः, शयनगृहं च अनिद्रां परिहारति। यस्मिन् काले पुरुषस्य निद्रा अभ्यस्ता तदा एव स्वपः अनिद्रादोषं परिहरति।

**निद्रायाः विशेषाः** – निद्रायाः निमित्तमनुसृत्य षड्विधभेदाः निरूपिताः आयुर्वेदे। ते च तमोभवा, श्लेष्मसमुद्भवा, मनःशरीरश्रान्तसम्भवा, आगुन्तुकी, व्याध्यनुवर्तिनी, रात्रिस्वभावप्रभवा च। तमोगुणस्य प्राचुर्यात् तमोभवा निद्रा, कफदोषात् श्लेष्मसम्भवा, मनः शरीरं च यदा श्रान्तं तदा समुद्भवा, रिष्टभूता अगन्तुकी, सन्निपातज्वारादिकार्या व्याध्यनुवर्तिनी, रात्रिस्वभावात् या निद्रा सा रात्रिप्रभवा। अतः दिवा प्रभवन्ती या निद्रा सा तमःप्रभृतिभ्यः इति ज्ञेयम्। आसु रात्रिस्वभावानिद्रा भूतधात्री उच्यते। तमःप्रभवा पापमूला भवति। एवं चिकित्सकानाम् दृष्ट्या निद्रा विवृता।

## स्मृतिः

संसाकामात्रजन्यं ज्ञानं स्मृतिः उच्यते। उक्तं च - "संस्कारमात्रजं हि विज्ञानं स्मृतिः", संस्कारमात्रजन्यत्वस्य स्मृतित्वप्रयोजकतया"[56] इति। संस्काराः तु पूर्वानुभवैः जन्याः अन्तःकरणे भवन्ति। उक्तं च - "अनुभूतमात्रज्ञानं स्मृतिः"[57] इति।

---

[56] भामती २/२/२९, वे.परि.अनुमानपरिच्छेदः

[57] न्यायनिर्णयः २/४/१२

सदृशवस्तुसन्दर्शनादिनिमित्तैः उद्बुद्धाः संस्काराः स्मृतिं जनयन्ति। अचार्याश्च स्मृतेः अन्तःकरणधर्मत्वं प्रतिपादयन्ति - "स्मरणं स्मरो अन्तःकरणधर्मः"[58] इति।

योगमते अपि "अनुभूतविषयासम्प्रमोषः स्मृतिः"[59] इति स्मृतिः सूत्रिता। अत्र अस्म्प्रमोषपदस्य अचौर्यमर्थः। लोके पितृप्रदत्तसम्पद्व्यतिरेकेण अन्यसम्पदः आहरणं चौर्यमुच्यते। पितृसम्पदः एव स्वीकारः अचौर्यं भवति। तथा स्मृतिः स्वजनकस्य अनुभवस्य अतिरिक्तं किञ्चिद् यदि स्मरति तर्हि तच्चौर्यं स्यात्। किन्तु स्मृतिः न तथा अनुभवव्यतिरिक्तं किञ्चित् स्मरति। प्रमाणादिभिः अनुभूतस्य विषस्य संस्कारद्वारेण बुद्धौ आरोहः स्मृतिः। अतः सा प्रमाणविपर्ययविकल्पनिद्रानिमित्ता।

आयुर्वेदे अपि "दृष्टश्रुतानुभूतानां स्मरणात् स्मृतिरुच्यते"[60] इति स्मृतिलक्षणं प्रतिपादितम्। दृष्टं प्रत्यक्षोपलक्षणं, श्रुतमागमप्रतीतम्। एवं प्रमाणैः गृहीतानां विषयाणां स्मरणं स्मृतिरिति सिद्धं भवति।

प्रमाणैः अनुभूतविषस्य संस्कारद्वारेण बुद्धौ आरोहः इत्यनेन स्मृतेः प्रमात्वं न सिध्यति। यतः तस्याः साक्षात् प्रत्यक्षादिप्रमाणानि करणानि न भवन्ति। करणं च व्यापरवदसाधारणं कारणम्। किन्तु संस्काराणामेव करणत्वं स्मृत्युत्पत्तौ। प्रत्यक्षादीनां तु निमित्तकारणत्वमात्रम्। वेदान्ते च अनधित-अबाधितार्थविषयस्य एव प्रमात्वनिश्चयात्। व्यावहारे भाट्टनयः इति स्वीकारात् मीमांसाशास्त्राभिमतं स्मृतिव्यावृत्तमेव प्रमात्वं वेदान्तिभिः अङ्गीक्रियते। उक्तं च – "प्रमा करणं प्रमाणम्। तत्र स्मृतिव्यावृत्तं प्रमात्वं, अनधिगत-अबाधितार्थविषयज्ञानत्वम्"[61]। अपि च प्रत्यक्षे ज्ञानगतं प्रत्यक्षं विषयगतं प्रत्यक्षमिति ज्ञानस्य विषयस्य च प्रत्यक्षत्वं भवति। अतः तज्जनितः संस्कारः अपि तथैव ज्ञानाकारः विषयाकारश्च भवति। तेन संस्कारोत्थस्मृतिरपि विषयाकारः ज्ञानाकारश्च भवति। तर्हि अनुभवस्मृत्योः भेदः न स्यादिति शङ्का न कार्या। अनुभवते तु अज्ञातविष्यस्य ज्ञानं भवति। स्मृतौ तु ज्ञातस्य विषयस्य एव पुनः ज्ञानं भवति इति भेदः।

अनुभवस्य संस्कारात्मना विद्यमनस्य उत्थाने हेतवः आयुर्वेदशास्त्रे अष्टसंख्याकाः प्रतिपादिताः। ते च निमित्तं, रूपग्रहणं, सादृश्यं, सविपर्ययः, सत्वानुबन्धः, अभ्यासः, ज्ञानयोगः, पुनःश्रवणमिति। तत्र निमित्तं नाम कारणज्ञानम्। कारणं दृष्ट्वा कार्यं स्मरति। रूपग्रहणं नाम आकारग्रहणम्। यथा वने गवयाकारं दृष्ट्वा गां स्मरति। सादृश्यं यथा पितुः सदृशं पुरुषम् दृष्ट्वा पितरं स्मरति। सविपर्ययः अत्यन्तं विसदृशता, तेनापि स्मरणं भवति। यथा अत्यन्तं कुरूपं दुष्ट्वा तद्विरोधिधर्मवन्तं स्फुरद्रूपिणं स्मरति। सत्वानुबन्धं नाम मनसः एकाग्रता। एकाग्रमनाः अपेक्षितमर्थं स्मर्तुं समर्थो भवति। अभ्यस्तमर्थम् अभ्यासबलादेव स्मरति इति अभ्यासः अपि संस्कारोदये कारणम्। ज्ञानयोगात् इति तत्वज्ञानबलात् स्मरति। पुनःश्रवणं च श्रुतेऽपि अर्थे विस्मृते पुनः

[58] छा.भा ७/१३/१

[59] यो.सू १/११

[60] च.सं.श १/१४९

[61] वे.परि.प्रत्यक्षपरिच्छेदः

तदेकदेशश्रवणेनैव स्मरति। उक्तं च – "वक्ष्यन्ते कारणान्यष्टौ स्मृतिर्यरुपजायते।निमित्तरूपग्रहणात् सादृश्यात् सविपर्ययात्। सत्त्वानुबन्धादभ्यासाज्ज्ञानयोगात् पुनः श्रुतात्॥"[62] इति।

**उपसंहारः –**

एवं योगशास्त्रे यः वृत्तीनां पञ्चविभागः कृतः सः वेदान्तिभिरपि अनुमन्यते। किन्तु तेषां स्वरूपे तु कुत्रचित् सहमतिः कुत्रचित् वैमत्यं स्पष्टं लक्ष्यते। प्रमाणषट्कमिति वेदान्तिभिः प्रतिपादितम्। योगिनः अयुर्वेदिनः त्रीण्येव प्रमाणानि अङ्गीकुर्वन्ति। विपर्यस्य, निद्रायाः अन्तःकरणवृत्तित्वे वेदान्तिनामरुचिः दृश्यते। किन्तु विपर्यय-निद्रयोः अविद्यावृत्तित्वं वेदान्तिनः प्रतिपादयन्ति। विपर्यय-स्मृत्योः विषये योग-वेदान्तशास्त्रयोः सहमति लक्ष्यते।

**संक्षेपाक्षरसूची**

१. तै.उ- तैत्तिरियोपनिषत्.

२. प्र.उ – प्रश्नोपनिषत्.

३. मुं.उ- मुण्डकोपनिषत्.

४. मां.उ – माण्डुक्योपनिषत्.

५. ऐ.उ- ऐतरेयोपनिषत्.

६. छां.भा- छान्दोग्यभाष्यम्.

७. बृ.भा- बृहदारण्यकोपनिषत्.

८. तै.भा – तैत्तिरियोपनिषदः शाङ्करभाष्यम्.

९. प्र.भा – प्रश्नोपनिषदः शाङ्करभाष्यम्.

१०. मुं.उ- मुण्डकोपनिषदः शाङ्करभाष्यम्.

११. मां.भा- माण्डुक्योपनिषदः शाङ्करभाष्यम्

१२. ऐ.भा- ऐतरेयोपनिषदः शाङ्करभाष्यम्.

१३. छां.भा- छान्दोग्योपनिषदः शाङ्करभाष्यम्.

१४. अ.भा – अध्यासभाष्यम्.

१५. सू.भा- ब्रह्मसूत्र-शाङ्करभाष्यम्.

१६. अ.सि- अद्वैतसिद्धिः.

१७. वे.सा- वेदान्तसारः.

१८. वे.परि- वेदान्तपरिभाषा.

---

[62] च.श १/१४९

१९. पं.दशी- पञ्चदशी.

२०. वि.चू.म- विवेकचूडामणिः.

२१. यो.सू- योगसुत्रम्.

२२. व्यासभाष्यम्- योगसूत्र-व्यासभाष्यम्.

२४. आचार्यः- शङ्कराचार्यः.

२५.च.सं.सू – चरकसंहिता, सूत्रस्थानम्

२६. च.सं.श – चरकसंहिता, शरीरस्थानम्

२७.मां.का – माण्डूक्यकारिका

## ग्रन्थसूची


१. **उपनिषद्भाष्यम् (खण्ड १,२,३)** श्री मणिद्रविड सम्पादितम् / अद्वैतग्रन्थरत्नमञ्जूषा २ / *प्रकाशनम्* - महेश अनुसन्धान संस्थानम्(श्री दक्षिणामूर्तिमठ प्रकाशन), वारणासी / द्वितीयं संस्करणम्।

२. **श्रीमद्भगवद्गीता (शाङ्करभाष्य-अष्टटीकाभ्यः उपेता)** श्री वासुदेवशर्मणा संस्कृतम् / व्रजजीवन प्राच्यभारती ग्रन्थमाला ६४ / *प्रकाशनम्* - चौकम्बा संस्कृत प्रतिष्ठान, दिल्ली / पुनर्मुद्रित संस्करण २०१६

३. **ब्रह्मसूत्रशांकरभाष्यम्(भाष्यरत्नप्रभा-भामती-न्यायनिर्ण-व्याख्योपेता)** श्री अचार्यजगदीशशास्त्रिणा सम्पादितम् / *प्रकाशनम्* - मोतिलाल बनारसीदास,दिल्ली / प्रथम मुद्रण - १९८० , पुनर्मुद्रण – २००५।

४. **अद्वैतसिद्धिः (बालबोधिनी व्याख्योपेता, प्रथमो भागः)** शेखरदेवशर्मणा सम्पादितम् / प्राच्यभारती ग्रन्थमाला – १२ / *प्रकाशनम्* - रत्ना पब्लिकेशन्, वारणासी / द्वितीयं मुद्रणम् २००७।

५. **सर्वदर्शनसङ्ग्रहः** श्री टि.जि मायांकर् सम्पादितम् / राजकीया प्राच्यग्रन्थश्रेणिः - “ए” १ / *प्रकाशनम्* - भण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, पुणे,१९७८ / तृतीयं मुद्रणम्।

६. **पञ्चदशी** वासुदेवशर्मणा संस्कृतम् / हरिदास संस्कृत ग्रन्थमाला – ३२८ / *प्रकाशनम्* - संस्कृत सीरिज आफीस, वारणासी / संस्करणम् – २००९।

७. **ವೇದಾಂತಸಾರ** ಸ್ವಾಮಿ ಹರ್ಷಾನಂದ ಸಂಪಾದಿತ / *ಪ್ರಕಾಶನ* - ಶ್ರೀ ರಾಮಕೃಷ್ಣಾಶ್ರಮ, ಮೈಸೂರು / ನಾಲ್ಕನೆಯ ಮುದ್ರಣ.

८. **चरक संहिता** डा॥यादवजी त्रिकमजी आचार्य सम्पादित / काशी संस्कृत ग्रन्थमाला -१९४ / *प्रकाशनम्* - चौकम्बा संस्कृत संस्थान, वारणासी / संस्करण - पुनर्मुद्रित,वि.सं. २०७३।

९. **सुश्रुतसंहिता** काशी संस्कृत ग्रन्थमाला -१५६ / *प्रकाशन* - चौकम्बा संस्कृत संस्थान, वारणासी / संस्करण - पुनर्मुद्रण, वि.सं. २०७५।

१०. **पातञ्जलयोगदर्शनम् (व्यासभाष्यसहितम्)** काशी संस्कृतग्रन्थमाला – २०१ / *प्रकाशन* - चौकम्भा प्रकाशन, वारणासी / संस्करण - पुनर्मुद्रित, वि.स २०७४।